तारसारः ४ तुरीयम् ५ चित्रशिखी६ निरालम्बम् ७ परमहंसः ८ पैङ्गलम् ९ ब्राह्मणमण्डलम् १० ब्राह्मणदयतारकम् ११ भिक्षु १२ मल्लिका १३ मुक्तिका १४ याज्ञवल्क्यम् १५ बृहदारण्यकम् १६ शाट्यायणी १७ सुबालः १८ हंसः १९ ॥*॥

कृष्णयजुर्व्वेदान्तर्गता द्वात्रिंशत्-संख्यकाः उपनिषदः यथा,—

अक्षि१ अमृतनादः२ अमृतविन्दुः३ अवधूतम्४ एकाक्षरा५ कठरुद्रः६ कठवल्ली७ कलिसन्तरणम्८ कालाग्निरुद्रः९ कैवल्यम्१० क्षुरिका११ गर्भः१२ तेजोविन्दुः१३ तैत्तिरीयकम्१४ दक्षिणामूर्त्तिः१५ ध्यानविन्दुः१६ नारायणं१७ पञ्चब्रह्म१८ प्राणाग्निहोत्रम्१९ ब्रह्म२० ब्रह्मविद्या२१ योगकुण्डलिनी२२ योगतत्त्वम्२३ योगशिखा२४ वराहः२५ शारीरकम्२६ शुकरहस्यम्२७ श्वेताश्वतरः२८ सर्व्वसारः २९ स्कन्दः ३० सरस्वतीरहस्यम् ३१ हृदयम् ३२ ॥*॥

ऋग्वेदान्तर्गता दशसंख्यका उपनिषदः यथा,—

अक्षमालिका१ आत्मप्रबोधः२ ऐतरेयः३ कौषितकी४ त्रिपुरा५ नादविन्दुः६ निर्वाणम्७ मुद्गलाः८ बह्वृचः९ सौभाग्यम्१० ॥*॥

अथर्व्ववेदान्तर्गता एकत्रिंशत्संख्यका उपनिषदः, अथर्व्वशिखा१ अथर्व्वशिरः२ कृष्णः३ गणपतिः४ गारुडम् ५ गोपालतापनम् ६ जावालम् ७ त्रिपुरातपनम् ८ दत्तात्रेयः ९ देवी१० नारदपरिव्राजकः११ नृसिंहतापनी १२ परब्रह्म१३ परिव्राजकान्नपूर्णा १४ परमहंसः १५ पाशुपतम् १६ प्रश्नम्१७ भस्म१८ भावना१९ महानारायणम्२० महावाक्यम् २१ माण्डूक्यम्२२ मुण्डकम्२३ रामतापनी २४ रामरहस्यम् २५ वृहज्जाबालम् २६ शरभम्२७ शाण्डिल्यम्२८ सीता२९ सूर्य्यात्म३० हयग्रीवम् ३१॥*॥)

उपनिष्कारं, क्ली, (उपनिष्किरन्ति सैन्यान्यत्र। उप +निस्+कॄ+घ। ऋदोरप् तु न। अपोबाधकस्य ल्युटोऽपि घस्यापवादत्वात्। यद्वा उपनिष्कीर्य्यते सैन्यैर्ह्यते इति। कृ+कर्म्मणि अप्। इदुदुपधस्येति षः।) पुरपथः। इत्यमरः॥ राजपथः। इति हेमचन्द्रः॥

उपनिष्क्रमणं क्ली, (उपनिष्क्रम्यतेऽनेन उप+निर्+क्रम+ल्युट्।) राजपथः। इति हेमचन्द्रः॥ निष्क्रमणनामसंस्कारः॥

उपनीतः, पुं, (उप+नी+क्त।) कृतोपनयनः। इति स्मृतिः॥ ("अथोपनीतं विधिवद् विपश्चितः"। इति रघुः। ३। २९।) निकटप्राप्ते त्रि॥

उपन्यासः, पुं, (उप+नि+अस् क्षेपणे+घञ्।) वाक्योपक्रमः। तत्पर्य्यायः। वाङ्मुखम् २। इत्यमरः॥ ("तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन"। इति शारीरकभाष्ये॥ ९४।७। विचारः। यथा, मनुः ९।३१।

"विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत"॥

"वक्ष्यमाणं सर्व्वजनहितं विचारं शृणुत"। इति तट्टीका।

धनादीनामर्पणम्। गच्छित इति भाषा॥)

उपपतिः, पुं, (उपमितः पत्या। अवादयः क्रुष्टाद्यर्थे तृतीयया इति समासः।) जारः। इत्यमरः॥ नां इति भाषा। तस्य लक्षणम्। आचारहानिहेतुः पतिः। स चतुर्व्विधः। सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः १। सकलनायिकाविषयसमसहजानुरागो दक्षिणः२। भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः ३। कामिनीविषयकपटपटुः शठः ४। इति रसमञ्जरी॥ (यथा, मनुः ३।१५५।

"पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे"॥)

उपपत्तिः, स्त्री, (उप+पद+क्तिन्।) सङ्गतिः। निर्वृतिः। समाधानम्। सिद्धान्तः। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः। इति वेदान्तसारः॥ ("उपपत्तिमदूर्ज्जिताश्रयम्"। इति भारविः। २।१॥) हेतुः। यथा,—

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः"। इत्यत्र उपपत्तिभिर्बहुभिर्हेतुभिरिति पक्षताग्रन्थमाथुरी॥ सङ्गतिः। यथा,—

"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः"। इति भाषापरिच्छेदः।८२॥ (उपायः। यथा माघे। "अपेक्षितान्योन्यबलोपपत्तिभिः"। सिद्धिः। प्राप्तिः। "स्वार्थोपपत्तिं प्रति दुर्व्बलाशः"। इति रघुः॥ ५।१२॥)

उपपदं, क्ली, (उपोच्चारितं पदम्।) लेशः। इति त्रिकाण्डशेषः॥ समीपोच्चारणीयपदम्। (यथा, रघौ१६।४०। "तस्याः स राजोपपदं निशान्तम्"॥) यथा वा नामोत्तरे शर्म्मवर्म्मादि। समभिव्याहृतस्वार्थपोषकपदम्। यथा प्रहारादौ प्रादि। इति व्याकरणम्॥

उपपातकं, क्ली, (उपपातयति नरके यत्। उप+पत्+णिच्+ण्वुल्। यद्वा उपमितं पातकेन।) पापविशेषः। तत्तु ऊनपञ्चाशद्विधंयथा। गोवधः १ अयाज्ययाजनम् २ परदारगमनम् ३ आत्मविक्रयः ४ गुरुत्यागः ५ मातृत्यागः ६ पितृत्यागः ७ एषां शुश्रूषाद्यकरणं त्यागः। स्वाध्यायत्यागः ८ स तु सर्व्वदा ब्रह्मयज्ञत्यागः। अधीतवेदविस्मरणञ्च। अग्नित्यागः ९ स तु स्मार्त्ताग्निहोत्रत्यागः। सुतत्यागः१० स तु तस्य संस्कारभरणाद्यकरणम्। परिवित्तिता ११ सा तु कनिष्ठेन आदौ विवाहे कृते ज्येष्ठस्य। परिवेदनं १२ तत्तु अकृतदारज्येष्ठसत्त्वे कनिष्ठस्य। तयोः कन्यादानं १३ तयोर्याजनं १४ तत्तु तयोरेव विवाहादौ पौरोहित्यम्। कन्याया दूषणं १५ तत्तु मैथुनवर्जमङ्गुलीप्रक्षेपादिना स्रवणम्। अङ्गुल्या योनिविदारणमिति यावत्। वार्द्धुष्यं १६ तत्तु निषिद्धवृद्धिजीवनम्। व्रतलोपः १७ स तु ब्रह्मचारिणो मैथुनम्। तडागविक्रयः१८ आरामविक्रयः १९ दारविक्रयः २० अपत्यविक्रयः २१ व्रात्यता २२ सा तु यथाकालमनुपनयनम्। बान्धवत्यागः २३ भृताध्यापनम् २४ तत्तु प्रतिनियतवेतनग्रहणपूर्व्वमध्यापनम्। भृताध्ययनम् २५ तत्तु वेतनप्रदानपूर्व्वकाध्ययनम्। अपण्यानां विक्रयः २६ स तु तिललाक्षागोरसादीनां ब्राह्मणेन विक्रयः। सर्व्वाकरेष्वधीकारः २७ स तु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञया अधिकारः। महायन्त्रप्रवर्त्तनं २८ तत्तु नद्या उदकप्रवाहप्रतिबन्धहेतूनां सेतुबन्धादीनाञ्च प्रवर्त्तनं अथवा तैलादियन्त्रस्य शस्त्रतेजनादियन्त्रस्य च। ओषधिहिंसनं २९ तत्तु धान्यादीनां यथाकथञ्चिन्नाशः। स्त्र्याजीवः ३० स तु भार्य्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनम्। अभिचारकर्म्म ३१ तत्तु श्येनादिना यज्ञेन अनपराद्धस्य मारणम्। मूलकर्म्म ३२ तत्तु मन्त्रौषधादिना वशीकरणम्। इन्धनार्थमशुष्कद्रुमाणां छेदनं ३३ आत्मार्थं क्रियारम्भः ३४ स तु अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठानम्। निन्दितान्नस्य भक्षणम् ३५ तत्तु लशुनादेः सकृदनिच्छया अथवा गणकदेवलतस्कराद्यन्नभक्षणम्। अनाहिताग्निता ३६ सा तु समर्थस्य श्रौतस्मार्त्ताग्न्यपरिग्रहः। स्तेयं ३७ तत्तु सुवर्णद्रव्यादन्यसारद्रव्यापहरणम्। देवर्षिपितॄणां ऋणाशोधनं ३८ असच्छास्त्राभिगमनम् ३९ तत्तु श्रुतिस्मृतिविरुद्धशास्त्रशिक्षणम् पाषण्डशास्त्राभ्यासो वा। कौशीलव्यक्रिया ४० सा तु तौर्य्यत्रिकस्य सततानुष्ठानम्। धान्यस्तेयं ४१ पशुस्तेयम् ४२ कुप्यस्तेयम्४३ मद्यपस्त्रीनिषेवनम्४४ स्त्रीवधः ४५ शूद्रवधः ४६ वैश्यवधः ४७ क्षत्रियवधः ४८ नास्तिक्यम् ४९। तत्तु अदृष्टार्थकर्म्माभावबुद्धिः। नास्ति परलोक इति वा। इति मनुः शूलपाणिश्च॥ (अस्य प्रायश्चित्तादिकं प्रायश्चित्तशब्दे द्रष्टव्यम्॥)

उपपापं, क्ली, (उपमितं पापेन।) उपपातकम्। इति स्मृतिः॥

उपपुरं, क्ली, (उप समीपे पुरम्।) शाखानगरम्। इति हेमचन्द्रः॥

उपपुराणं, क्ली, (उपमितं पुराणैः।) व्यासकृताष्टादशपुराणसदृशगणनामुन्यादिप्रणीताष्टादशपुराणम्। यथा,—

"अन्यान्युपपुराणानि मुनिभिः कथितान्यपि।
आद्यं सनत्कुमारोक्तं१ नारसिंहं२ ततः परम्॥
तृतीयं वायवीयञ्च३ कुमारेण च भाषितम्।
चतुर्थं शिवधर्म्माख्यं४ साक्षान्नन्दीशभाषितम्॥
दुर्व्वाससोक्तमाश्चर्य्यं५ नारदीयमतःपरम्६।
नन्दिकेश्वरयुग्मञ्च७ तथैवोशनसेरितम्८॥
कापिलं९ वारुणं१० शाम्बं११ कालिकाह्वयमेव च१२।
माहेश्वरं१३तथा कल्की१४ दैवं१५ सर्व्वार्थसिद्धिदम्॥
पराशरोक्तमपरम्१६मारीचम्१७भास्कराह्वयम्१८"।

अत्र दैवं देवीपुराणम्। इति मलमासतत्त्वधृतकूर्म्मपुराणम्॥ (एषां विस्तृतिस्तु तत्तच्छब्दे द्रष्टव्या॥)

उपपुष्पिका, स्त्री, (उपगता पुष्पमिव विकाशत्वम्। जृम्भणसमये मुखव्यादानात् तथात्वम्।) जृम्भा। हाइ इति भाषा। तत्पर्य्यायः। हापिका २। इति हारावली॥